ॐ

श्री लक्ष्मीनृसिंह परब्रह्मणे नमः।

श्री पद्मावती समेत वेङ्कटेशाय नमः।

श्री विष्णवे परमात्मने नमः।

श्रीमते रामानुजाय नमः।

श्री निगमान्त महा देशिकाय नमः।

श्री सायिराम्।

# मन्त्रपुष्पम्

Mantrapushhpa is a collection of select verses from major scriptures, generally the first or the first few verses. In shrii-vaishhNava saampradaaya, mantrapushhpa is usually recited during the archana portion of ijyaaraadhana, when tulasi archana is performed.

Mantrapushhpa may also be recited independently, and one can perform maanasika archana.

There are minor variations in the composition of mantrapushhpa even within the shrii-vaishhNava saampradaaya. The following is one typical version.

हरिःओं। अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं। होतारꣳरत्नधातमं॥

हरिःओं॥

हरिःओं। इषे त्वोर्जे त्वा वायवस्स्थोपायवस्स्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मण

आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत

माघशꣳसो रुद्रस्य हेतिः परि वो वृणक्तु ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि॥

हरिःओं॥

हरिः ओं। अग्न आयाहि वीतये गृणानो हव्यदातये। निहोता सत्सि बर्हिषि॥
हरिः ओं॥

हरिः ओं। शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभिस्रवन्तु नः॥
हरिः ओं॥

हरिःओं। ओमित्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणायेत्युपरिष्टात्।
ओमित्येकाक्षरम्। नम इति द्वे अक्षरे। नारायणायेति पञ्चाक्षराणि। एतद्वै नारायणस्याष्टाक्षरं पदम्। यो ह वै नारायणस्याष्टाक्षरं पदमध्येति। अनपब्रुवस्सर्वमायुरेति। विन्दते प्राजापत्यं रायस्पोषं गौपत्यम्। ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति। य एवं वेद।
इत्युपनिषत्।
हरिःओं॥

योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान्भवति।
चन्द्रमावा अपां पुष्पं। पुष्पवान् प्रजावान् पशुमान्भवति।
य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति॥

अग्निर्वा अपामायतनम्। आयतनवान्भवति।
योऽग्नेरायतनं वेद। आयतनवान्भवति।
आपोवा अग्नेरायतनम्। आयतनवान्भवति।
य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति॥

वायुर्वा अपामायतनम्। आयतनवान्भवति।
योवायोरायतनं वेद। आयतनवान्भवति।
आपोवै वायोरायतनम्। आयतनवान्भवति।
य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति॥

असोवै तपन्नपामायतनम्। आयतनवान्भवति।
योऽमुष्य तपत आयतनं वेद। आयतनवान्भवति।
आपोवा अमुष्य तपत आयतनम्। आयतनवान्भवति।
य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति॥

चन्द्रमावा अपामायतनम्। आयतनवान्भवति।
यश्चन्द्रमस आयतनं वेद। आयतनवान्भवति।
आपोवै चन्द्रमस आयतनम्। आयतनवान्भवति।
य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति॥

नक्षत्राणिवा अपामायतनम्। आयतनवान्भवति।
यो नक्षत्राणामायतनं वेद। आयतनवान्भवति।
आपोवै नक्षत्राणामायतनम्। आयतनवान्भवति।
य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति।

पर्जन्योवा अपामायतनम्। आयतनवान्भवति।
यः पर्जन्यस्यायतनं वेद। आयतनवान्भवति।
आपोवै पर्जन्यस्याऽऽयतनम्। आयतनवान्भवति।
य एवं वेद। योऽपामायतनं वेद। आयतनवान्भवति॥

संवत्सरोवा अपामायतनम्। आयतनवान्भवति।
यः संवत्सरस्यायतनं वेद। आयतनवान्भवति।
आपोवै संवत्सरस्यायतनम्। आयतनवान्भवति।
य एवं वेद। योऽप्सुनावं प्रतिष्ठितां वेद प्रत्येव तिष्ठति॥

इमेवैलोका अप्सु प्रतिष्टिताः ।
राजाधिराजाय प्रसह्यसाहिने । नमोवयं वैश्रवणाय कुर्महे ।
समे कामान् कामकामायमह्यं । कामेश्वरोवैश्रवणो दधातु ।
कुबेराय वैश्रवणाय । महाराजाय नमः ॥

अथ कर्माण्याचाराद्यानि गृह्यन्ते उदगयनपूर्वपक्षाहः
पुण्याहेषु कार्याणि यज्ञोपवीतिना प्रदक्षिणम् ॥

इच्छामोहि महाबाहुं रघुवीरं महाबलं
गजेनमहता यान्तं रामंछत्रा वृताननं
तं दृष्ट्वा श्त्रु हन्तारं महषीणां सुखावहं
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ॥

तासामाविरभूच्छौरिः स्वयमान मुखाम्बुजः
पीताम्बरधरःस्रग्वी साक्षान्मन्मथ मन्मथः ॥

तमद्भुतं बालकमम्बुजेक्षणं
चतुर्भुजं शङ्खगदाद्युदायुधं
श्रीवत्सलक्ष्म्यं गलशोभि कौस्थुभं
पीताम्बरं सान्द्र पयोध सौभगं ॥

महार्हवैदूर्य किरीटकुन्टल त्विषा परिष्वक्त सहस्र कुन्तलं
उद्दामकाञ्च कदकङ्कणादिभिर्विरोचमानं वसुदेव ऐक्षत ॥

ज्योतींच विष्णुः भुवनानि विष्णुः वनानि विष्णुः गिरयो दिशश्च
नद्यः समुद्राश्च स एव सर्वं यदस्तियन्नस्ति च विप्रवर्याः ॥

मायावी परमानन्दं त्यक्त्वा वैकुण्ठमुत्तमं
स्वामि पुष्करणीतीरे रमया सह मोदते ।
भोगिराज गिरिंगत्वा स्वामि पुष्करणीतटे
रमते रमणी कान्ते रमणीये श्रियः पतिः ॥

वैकुन्ठेतु परेलोके श्रियासार्धं जगत्पतिः
आस्तेविष्णुरचिन्त्यात्मा भक्तैर्भागवतैस्सह ॥

अहो वीर्यमहो शौर्यमहो बाहुपराक्रमः
नारसिंहः परं दैवमहोबिलमहोबिलम् ॥

वेङ्कटाद्रि समं स्थानं ब्रह्माण्डे नास्ति किंचन
वेङ्कटेश समोदेवो न भूतो न भविष्यति ॥

फाल्गुनेमासि पूर्णायामुत्तरक्षेन्दुवासरे
गोविन्दराजो भगवानाविरासीन्महामुने ॥

कदा पुनः शङ्खरथाङ्गकल्पकध्वजारविन्दांकुशवज्रलांछनम्
त्रिविक्रम् त्वच्चरणाम्बुजद्वयं मदीयमूर्धानमलङ्करिष्यति ॥

अखिलभुवनजन्मस्थेमभङ्गादिलीले
विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा ॥

पाराशर्यवचस्सुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां
संसाराग्निविदीपनव्यपगतप्राणात्तसंजीविनीम्
पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थितां
आनीतान्तु निजाक्षरैस्सुमनसो भौमाःपिबन्त्वन्वहम् ॥

मणिवर इव शौरेर्नित्यहृद्योऽपि जीवः

कलुषमतिरविन्दन् किङ्करत्वाधिराज्यम् ।

विधिपरीणतिभेदाद्वीक्षितस्तेन काले

गुरुपरिषदुपज्ञं प्राप्य गोपायति स्वम् ॥

उपवीतिनमूर्ध्वपुण्ड्रवन्तं

त्रिजगत्पुण्यफलं त्रिदण्डहस्तम् ।

शणागतसार्थवाहमीडे

शिखयाशेखरिणं पतिं यतीनां ॥

भाद्रपदमासगतविष्णुविमलर्क्षे

वेङ्कटमहीद्रपतितीर्थदिनभूते ।

प्रादुरभवज्जगति दैत्यरिपुघण्टा

हन्त ! कवितार्किकमृगेन्द्रगुरुमूर्त्या ॥

दृग्भ्यां दीर्घानुकम्पाभ्यामस्मत् गुरु परम्परां

प्रेम्ना गोविन्दराजाय प्रेक्षमाणाय मङ्गळं ॥

कळ्यणाद्भुत गात्राय कामितार्थ प्रदायिने

श्रीमते वेङ्कटेशाय श्रीनिवसाय मङ्गळं ॥

श्री नगर्यां महापुर्यां ताम्रपर्न्युत्तरी तटे

तिन्त्रिणी मूलधाम्ने श्री शठकोपाय मङ्गळं ॥

ॐ शान्तिः शान्तिः शान्तिः

हरिः ओम्

**********

HOME | STOTRA LIST | PREVIOUS ARCHIVE | NEXT ARCHIVE

Hosted by tripod